# ॥ वाल्मीकि रामायण॥

## १ बालकाण्ड

### अध्याय ३८

विश्वामित्रवचः श्रुत्वा कथान्ते रघुनन्दन ।
उवाच परमप्रीतो मुनिं दीप्तमिवानलम् ॥ १॥

श्रोतुमिच्छामि भद्रं ते विस्तरेण कथामिमाम् ।
पूर्वको मे कथं ब्रह्मन्यज्ञं वै समुपाहरत् ॥ २॥

विश्वामित्रस्तु काकुत्स्थमुवाच प्रहसन्निव ।
श्रूयतां विस्तरो राम सगरस्य महात्मनः ॥ ३॥

शङ्करश्वशुरो नाम हिमवानचलोत्तमः ।
विन्ध्यपर्वतमासाद्य निरीक्षेते परस्परम् ॥ ४॥

तयोर्मध्ये प्रवृत्तोऽभूद्यज्ञः स पुरुषोत्तम ।
स हि देशो नरव्याघ्र प्रशस्तो यज्ञकर्मणि ॥ ५॥

तस्याश्वचर्यां काकुत्स्थ दृढधन्वा महारथः ।
अंशुमानकरोत्तात सगरस्य मते स्थितः ॥ ६॥

तस्य पर्वणि तं यज्ञं यजमानस्य वासवः ।
राक्षसीं तनुमास्थाय यज्ञियाश्वमपाहरत् ॥ ७॥

ह्रियमाणे तु काकुत्स्थ तस्मिन्नश्वे महात्मनः ।
उपाध्याय गणाः सर्वे यजमानमथाब्रुवन् ॥ ८॥

अयं पर्वणि वेगेन यज्ञियाश्वोऽपनीयते ।
हर्तारं जहि काकुत्स्थ हयश्चैवोपनीयताम् ॥ ९॥

यज्ञच्छिद्रं भवत्येतत्सर्वेषामशिवाय नः ।
तत्तथा क्रियतां राजन्यथाच्छिद्रः क्रतुर्भवेत् ॥ १०॥

उपाध्याय वचः श्रुत्वा तस्मिन्सदसि पार्थिवः ।
षष्टिं पुत्रसहस्राणि वाक्यमेतदुवाच ह ॥ ११॥

गतिं पुत्रा न पश्यामि रक्षसां पुरुषर्षभाः ।
मन्त्रपूतैर्महाभागैरास्थितो हि महाक्रतुः ॥ १२॥

तद्गच्छत विचिन्वध्वं पुत्रका भद्रमस्तु वः ।
समुद्रमालिनीं सर्वां पृथिवीम् अनुगच्छत ॥ १३॥

एकैकं योजनं पुत्रा विस्तारमभिगच्छत ॥ १४॥

यावत्तुरगसन्दर्शस्तावत्खनत मेदिनीम् ।
तमेव हयहर्तारं मार्गमाणा ममाज्ञया ॥ १५॥

दीक्षितः पौत्रसहितः सोपाध्यायगणो ह्यहम् ।
इह स्थास्यामि भद्रं वो यावत्तुरगदर्शनम् ॥ १६॥

इत्युक्त्वा हृष्टमनसो राजपुत्रा महाबलाः ।
जग्मुर्महीतलं राम पितुर्वचनयन्त्रिताः ॥ १७॥

योजनायामविस्तारमेकैको धरणीतलम् ।
बिभिदुः पुरुषव्याघ्र वज्रस्पर्शसमैर्भुजैः ॥ १८॥

शूलैरशनिकल्पैश्च हलैश्चापि सुदारुणैः ।
भिद्यमाना वसुमती ननाद रघुनन्दन ॥ १९॥

नागानां वध्यमानानामसुराणां च राघव ।
राक्षसानां च दुर्धर्षः सत्त्वानां निनदोऽभवत् ॥ २०॥

योजनानां सहस्राणि षष्टिं तु रघुनन्दन ।
बिभिदुर्धरणीं वीरा रसातलमनुत्तमम् ॥ २१॥

एवं पर्वतसम्बाधं जम्बूद्वीपं नृपात्मजाः ।
खनन्तो नृपशार्दूल सर्वतः परिचक्रमुः ॥ २२॥

ततो देवाः सगन्धर्वाः सासुराः सहपन्नगाः ।
सम्भ्रान्तमनसः सर्वे पितामहमुपागमन् ॥ २३॥

ते प्रसाद्य महात्मानं विषण्णवदनास्तदा ।
ऊचुः परमसन्त्रस्ताः पितामहमिदं वचः ॥ २४॥

भगवन्पृथिवी सर्वा खन्यते सगरात्मजैः ।
बहवश्च महात्मानो वध्यन्ते जलचारिणः ॥ २५॥

अयं यज्ञहनोऽस्माकमनेनाश्वोऽपनीयते ।

इति ते सर्वभूतानि निघ्नन्ति सगरात्मजः ॥ २६ ॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com